# आदर्शप्रश्नपत्रम्

संस्कृतसाहित्यम् Sanskrit Sahityam (348)

**परीक्षासमयावधिः (Time) होरात्रयम् (3 Hrs)** **पूर्णाङ्काः (Full Marks) - 100**

**निर्देशाः -**

1) अस्मिन् प्रश्नपत्रे [A] भागे 20, [B] भागे 6, [C] भागे 6, [D] 5, [E] भागे 5 इति आहत्य 51 प्रश्नाः सन्ति।
2) समे प्रश्ना अनिवार्याः। तत्र वैकल्पिकभागेषु एकः एव समाधेयः।
3) प्रत्येकं प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काःxप्रश्नाः=पूर्णाङ्काः) इति अङ्काः दीयन्ते।
4) A भागे प्र.सं. 1 तः 20 पर्यन्तं – बहुविकल्पप्रकारस्य प्रश्नाः (MCQs) येषु प्रत्येकं एकः अंकः भवति। एतेषु प्रत्येकस्मिन् प्रश्ने दत्तचतुर्णां विकल्पानां मध्ये सर्वाधिकं उपयुक्तं विकल्पं चित्वा लिखन्तु। एतेषु केषुचित् प्रश्नेषु आन्तरिकः विकल्पः प्रदत्तः अस्ति। एतादृशेषु प्रश्नेषु दत्तविकल्पेषु एकस्य एव प्रयासः करणीयः।
5) B भागे प्र.सं. 21 तः 35 पर्यन्तम् – वस्तुनिष्ठप्रश्नाः। प्रत्येकं प्रश्नः अंकद्वयात्मकः अस्ति। ते यथानिर्देशं समाधेयाः।
6) C भागे प्र.सं. 36 तः 41 पर्यन्तम् अतिलघूत्तरियाः प्रश्नाः प्रत्येकम् अंकद्वयात्मकाः सन्ति। ते यथानिर्देशं समाधेयाः।
7) D भागे प्र.सं. 42 तः 47 पर्यन्तम् अनतिदीर्घोत्तरीयाः प्रश्नाः प्रत्येकम् अंकत्रयात्मकाः सन्ति। ते यथानिर्देशं 50 शब्दानां परिधिमध्ये समाधेयाः।
8) E भागे प्र.सं. 48 तः 51 पर्यन्तम् दीर्घोत्तरीयाः प्रश्नाः प्रत्येकम् पञ्च अंकात्मकाः सन्ति। ते यथानिर्देशं 80 तः 100 शब्दानां परिधिमध्ये समाधेयाः।
9) समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि।
10) स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या नूंन लेख्या।
11) उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति।
12) समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि।
13) निरीक्ष्यताम् यत् प्रश्नपत्रस्य पुटसंख्या प्रश्नानां च संख्या प्रथमपुटस्य प्रारम्भे प्रदत्तसंख्या समाना न वा। प्रश्नक्रमः सम्यग् न वा।
14) अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपुटे नूनं लेख्यः।

## [A] विंशतिप्रश्नानां युक्तं विकल्पं चिनुत। 1x20=20

1) मालविकाग्निमित्रनाटकस्य रचयिता कः। 1

(क) कालिदासः (ख) भारविः (ग) अश्वघोषः (घ) माघः।

अथवा

किरातार्जुनीये किरातपदेन कस्य बोधः।

(क) भीमस्य (ख) विष्णोः (ग) महादेवस्य (घ) युधिष्ठिरस्य।

2) कालिदासः कस्य अलङ्कारस्य वर्णने विचक्षणः। 1

(क) रूपकस्य (ख) उत्प्रेक्षायाः (ग) उपमायाः (घ) मालोपमायाः।

अथवा

अश्वघोषस्य का कृतिः।

(क) सूत्रालङ्कारः (ख) प्रतिमा (ग) अभिषेकः (घ) श्रुतबोधः।

3) मूढ किं जहीहि। 1

(क) धनागमतृष्णाम् (ख) सद्बुद्धिम् (ग) वितृष्णाम् (घ) वित्तम्।

अथवा

कालः निमेषात् किं हरति।

(क) कामम् (ख) क्रोधम् (ग) धनजनयौवनसमूहम् (घ) वित्तगर्वम्।

4) शिवराजविजयस्य रचयिता कः। 1

(क) कालिदासः (ख) अम्बिकादत्तव्यासः (ग) वेदव्यासः (घ) भारविः।

अथवा

'हिंस्रः स्वपापेन विहिंसितः' इत्यादिकः श्लोकः कस्मिन् ग्रन्थे विद्यते।

(क) महाभारते (ख) भागवते (ग) रामायणे (घ) विष्णुपुराणे।

5) व्यर्थं _______ मय्यसहिष्णुः। 1

(क) कुप्यसि (ख) हृष्यसि (ग) नृत्यसि (घ) क्रुध्यसि।

अथवा

_______ स्वधर्मं बहु मन्यते।

(क) अरोगस्तरुणो वाग्मी (ख) लोके पुरुषसारज्ञः (ग) कुलोचितमतिः क्षात्रं (घ) नाश्रेयसि रतो यश्च।

6) कुटीरस्य पूर्वतः किम् आसीत्। 1

(क) पयःपूरितं सरः (ख) पर्वतखण्डः (ग) पुष्पवाटिका (घ) तपोवनम्।

अथवा

भगवान् सूर्यः शोकविमोकः कस्य।

(क) आकाशमण्डलस्य (ख) खेचरचक्रस्य (ग) आखण्डलदिशः (घ) कोकलोकस्य।

7) "अहो चिररात्राय प्रसुप्तोऽहम्" इति कस्य वचनम्। 1

(क) श्यामवटोः (ख) गौरवटोः (ग) योगिराजस्य (घ) शिवराजस्य।

अथवा

निजकर्मोपात्तम् इत्यत्र कः समासः।

(क) बहुव्रीहिः (ख) अव्ययीभावः (ग) तृतीयातत्पुरुषः (घ) चतुर्थीतत्पुरुषः।

8) मायामयमिदं हित्वा इत्यत्र हित्वा इति पदस्य अर्थः कः। 1

(क) स्वीकृत्य (ख) त्यक्त्वा (ग) वर्णयित्वा (घ) गत्वा।

अथवा

अनृतकथः इत्यत्र कः समासः।

(क) बहुव्रीहिः (ख) अव्ययीभावः (ग) तत्पुरुषः (घ) द्वन्द्वः।

9) अवादीत् इत्यत्र का व्युत्पत्तिः। 1

(क) वद्+लुङ् तिप् (ख) वद्+लङ् तिप् (ग) वद्+लृङ् तिप् (घ) वद्+विधिलिङ् तिप्।

अथवा

कश्चिद् गुरुसेवनपटुर्विप्रवटुः इत्यत्र विप्रवटुः इत्यत्र कः समासः।

(क) बहुव्रीहिः (ख) अव्ययीभावः (ग) द्वन्द्वः (घ) कर्मधारयः।

10) तारापीडस्य प्रधानामात्यः कः। 1

(क) चन्द्रापीडः (ख) शुकनासः (ग) शूद्रकः (घ) पुष्पोद्भवः।

अथवा

अनर्थपरम्परा का।

(क) अभिनवयौवनत्वम् (ख) अरत्नालोकोच्छेद्यत्वम् (ग) अप्रदीपप्रभापनेयत्वम् (घ) अनञ्जनवर्तिसाध्यत्वम्।

11) श्रीः किं न रक्षति। 1

(क) अभिजनम् (ख) परिचयम् (ग) रूपम् (घ) कुलचक्रम्।

12) राजलक्ष्मीः कम् ईर्ष्यया न आलिङ्गति। 1

(क) गुणवन्तम् (ख) उदारसत्त्वम् (ग) सरस्वतीपरिगृहीतम् (घ) सुजनम्।

13) नाल्पमप्युपदेष्टव्यम् इत्यत्र सन्धिविच्छेदः कः। 1

(क) न अल्पमपि उपदेष्टव्यम् (ख) नाल्पम् अपि उपदेष्टव्यम् (ग) नाल्पमपि उपदेष्टव्यम् (घ) न अल्पम् अपि उपदेष्टव्यम्।

14) धनोत्पन्नस्य नेत्ररोगस्य कीदृशं स्वरूपम्। 1

(क) अनञ्जनवर्तिसाध्यः (ख) अशिशिरोपचारहार्यः (ग) अस्नानशौचवध्यः (घ) अपरिणमोपशमः।

15) राजा तारापीडः प्रतीहारान् किमर्थम् उपकरणसङ्ग्रहार्थम् आदिष्टवान्। 1

(क) भोजनाय (ख) युद्धाय (ग) राज्याभिषेकाय (घ) यौवराज्याभिषेकाय।

16) किं मनुष्यान् अधः पातयति। 1

(क) विषयात्यासङ्गः (ख) कुबुद्धिः (ग) प्रकृतिः (घ) राजलक्ष्मीः।

17) 'न ह्येवंविधम् अपरिचितमिह जगति किञ्चिदस्ति, यथेयमार्या।' इत्यत्र इदम्शब्देन कस्या ग्रहणम्। 1

(क) कादम्बर्याः (ख) विलासवत्याः (ग) राजलक्ष्म्याः (घ) पद्मावत्याः।

18) पारिजातपल्लवेभ्यः किं स्वीकृत्य एव राजलक्ष्मीः उद्गता। 1

(क) एकान्तवक्रताम् (ख) चञ्चलताम् (ग) मोहनशक्तिम् (घ) रागम्।

19) राजलक्ष्म्याः निष्ठुरतागुणः कस्माद् आगता। 1

(क) कौस्तुभमणेः (ख) कालकूटात् (ग) उच्चैःश्रवसः (घ) इन्दुशकलात्।

20) राजलक्ष्मीः कया तुल्या अचिरद्युतिकारिणी। 1

(क) हिडिम्बया (ख) पालातगुहया (ग) दिवसकरगत्या (घ) प्रावृडा।

**[B] पञ्चदशप्रश्नानां (21-35) यथानिर्देशम् उत्तराणि लिखत। यत्र प्रश्ने विकल्पः दत्तः अस्ति तत्र अन्यतरः समाधेयः 2x15=30**

21) युक्तियुक्तं मेलनं कुरुत 2

I. शास्त्रजलप्रक्षालननिर्मला — क अव्ययीभावसमासः
II. समुपचितमूलदण्डकोशमण्डलम् — ख तत्पुरुषः
ग बहुव्रीहिः

22) युक्तियुक्तं मेलनं कुरुत 2

I. तरुणं सर्षपशाकं नवोदनं पिच्छिलानि च दधीनि — क रथोद्धताछन्दसः
II. न खलु न खलु बाणः सन्निपात्योऽयमस्मिन् — ख आर्याच्छन्दसः
ग मालिनीछन्दसः

23) युक्तियुक्तं मेलनं कुरुत 2

III. गोष्ठे गिरिं सव्यकरेण धृत्वा — क शालिनीछन्दसः
IV. अंहो हन्ति ज्ञानवृद्धिं विधत्ते — ख आर्याच्छन्दसः
ग इन्द्रवज्राछन्दसः

24) युक्तियुक्तं मेलनं कुरुत 2

V. कालिदसः — क बुद्धचरितम्
VI. अश्वघोषः — ख किरातार्जुनीयम्
ग अभिज्ञानशाकुन्तलम्

अथवा

रिक्तस्थानं योग्यपदेन पूरयत – 2

I. गौरसिंहस्य कुटीरस्य चतुर्षु भागेषु .........पादपा आसन् ।

II. दुष्टानां यवनानाम् अत्याचारस्य वर्णनेन............ रसना भिन्ना न भवेत्।

25) युक्तियुक्तं मेलनं कुरुत 2

| | | |
|---|---|---|
| VII. | नैषधीयचरितम् | क कल्हणः |
| VIII. | राजतरङ्गिणी | ख श्रीहर्षः |
| | | ग भारविः |

26) निम्नलिखिविधानेषु सत्यम् असत्यम् वा इति निर्धारणं कुरुत 2

I. 'अपगतमले हि मनसि स्फटिकमणाविव रजनिकरगभस्तयो विशन्ति सुखेनोपदेशगुणाः।' इत्यस्मिन् वाक्ये अनन्वयः अलङ्कारः।

II. 'मनस्विनमुन्मत्तमिव उपहसति।' इत्यस्मिन् वाक्ये उत्प्रेक्षा अलङ्कार।

27) निम्नलिखिविधानेषु सत्यम् असत्यम् वा इति निर्धारणं कुरुत 2

I. सङ्केतितार्थस्य बोधिका अभिधा भवति।

II. वृत्तस्य अक्षरसंख्यातम् लक्षणम्।

अथवा

निम्नलिखिविधानेषु सत्यम् असत्यम् वा इति निर्धारणं कुरुत

I. वंशस्थच्छन्दः जगतीच्छन्दसि अन्तर्भवति।

II. अभिधा लक्षणा च एकस्याः शक्तेः प्रकारद्वयम् इति नागेशभट्टस्य मतम्

28) निम्नलिखिविधानेषु सत्यम् असत्यम् वा इति निर्धारणं कुरुत 2

I. कलिङ्गः साहसिकः इत्यत्र रूढौ लक्षणलक्षणा लक्षणा।

II. 'अश्वः श्वेतो धावति' इति रूढौ उपादानलक्षणायाः सारोपायाः शुद्धायाः उदाहरणम्

29) निम्नलिखिविधानेषु सत्यम् असत्यम् वा इति निर्धारणं कुरुत 2

I. मगणः आदिगुरुः

II. जिह्वेष्टिविश्रामस्थानं यतिः

30) निम्नलिखिविधानेषु सत्यम् असत्यम् वा इति निर्धारणं कुरुत 2

III. आलमगीरोपाधिधारी अवरङ्गजीवः अकबरशाहस्य प्रपौत्रः आसीत्।

IV. रामचन्द्रस्य कुलमूलं चन्द्रमा आसीत्।

31) रिक्तस्थानं योग्यपदेन पूरयत – 2

III. अभिधा इत्यत्र …………….. प्रत्ययः ।

IV. 'अङ्घ्रयो यस्य चत्वारस्तुल्यलक्षणलक्षिताः।' इति …………. लक्षणम्।

32) रिक्तस्थानं योग्यपदेन पूरयत – 2

I. इह ................. अम्बुधिसैः प्रथितम्।

II. रसै रुद्रैश्छिन्ना ...........शिखरिणी।

33) रिक्तस्थानं योग्यपदेन पूरयत –

I. उक्ता ………. तभाजा जगौ गः।

II. ननमयययुतेऽयं .......... भोगिलोकैः।

34) रिक्तस्थानं योग्यपदेन पूरयत – 2

III. अश्वघोषः सम्राजः ……………. सभायाम् आसीत्।

IV. सौन्दरानन्दं ……………. कृतिः अस्ति।

35) रिक्तस्थानं योग्यपदेन पूरयत – 2

I. मुख्यार्थबाधे तद्योगे ................ ऽथ प्रयोजनात्।

II. अन्योर्थो लक्ष्यते यत्सा ........... ऽरोपिता क्रिया॥

1. [C] षण्णां प्रश्नानां यथानिर्देशम् उत्तराणि लिखत। 2x6=12

36) माघस्य निवासस्थलं किं नगरम् आसीत्। अथवा तेन विरचितस्य शिशुपालवधस्य उपजीव्यं किम्। 2

37) 'दयितजनवियोगोद्वेगरोगातुराणाम्' इति पद्यं कस्मिन् काव्ये विद्यते। तस्य काव्यस्य रचयिता कः। 2

38) 'केशः काशस्तवकविकासः' इति श्लोके कीदृशः अनुप्रासः। तस्य किं लक्षणम्। 2

39) मुखचन्द्रः प्रकाशते इत्यत्र उपमा रूपकं वा अलङ्कारः। तस्य च लक्षणं किम्। 2

40) अपह्नुत्यलङ्कारस्य अथवा अनुप्रासस्य सोदाहरणं लक्षणं प्रतिपादयत। 2

41) रतिहासादीनाम् अभावे रसाः कुत्र लयं प्राप्नुवन्ति। अथवा रसः अभिव्यज्यते इति कस्य आचार्यस्य मतम्।2

[D] षट् अनतिदीर्घोत्तरैः समाधत्त। 3x6=18

42) योगिराजस्य समाध्याचरणं वर्णयत।

43) यवनशासनकाले कीदृशी मन्दिरादीनां दशा इति यथाग्रन्थं प्रतिपादयत।

44) यवनशासनकाले दक्षिणदेशं अथवा लक्ष्मीदुष्प्रभावः स्वभाषया प्रतिपादयत।

45) राजसभायां स्थिताः स्वार्थनिष्पादनपरा धूर्ताः कीदृशा भवन्ति।

46) राजानः कदा हास्यास्पदानि भवन्ति।

47) शुकनासस्य मते चन्द्रापीडस्य कर्तव्यं स्वभाषया प्रतिपादयत।

[E] चत्वारः दीर्घोत्तरैः समाधेयाः। 5x4=20

48) ब्रह्मचारिगुरुमुखेन बालिकाप्राप्तिवृत्तान्तं संक्षेपेण वर्णयत। अथवा सोमनाथमन्दिरलुण्ठनवृत्तान्तं वर्णयत।

49) दुराचारिण्या लक्ष्म्या वशीभूतानां राज्ञां दशा कीदृशी भवतीति यथाग्रन्थं वर्णयत। अथवा विवेकहीना राजानः किं किं कुर्वन्तीति यथाग्रन्थं वर्णयत।

50) पुनरुक्तवदाभासम् उपमां वा सोदाहरणं वर्णयत।

51) रससूत्रविषये मतभेदान् स्वभाषया वर्णयत।

--)(O)(--

संस्कृतसाहित्यम् Sanskrit Sahityam (348) MS

परीक्षासमयावधिः (Time) होरात्रयम् (3 Hrs) पूर्णाङ्काः (Full Marks) - 100

[A] विंशतिप्रश्नानां युक्तं विकल्पं चिनुत। 1x20=20

1) (क) कालिदासः 1

अथवा

(ग) महादेवस्य

2) (ग) उपमायाः 1

अथवा

(क) सूत्रालङ्कारः

3) (क) धनागमतृष्णाम् 1

अथवा

(ग) धनजनयौवनसमूहम्

4) (ख) अम्बिकादत्तव्यासः 1

अथवा

(ख) भागवते

5) (क) कुप्यसि 1

अथवा

(ग) कुलोचितमतिः क्षात्रं

6) (क) पयःपूरितं सरः 1

अथवा

(घ) कोकलोकस्य।

7) (ख) गौरवटोः 1

अथवा

(ग) तृतीयातत्पुरुषः

8) (ख) त्यक्त्वा 1

अथवा

(क) बहुव्रीहिः

9) (क) वद्+लुङ् तिप् 1

अथवा

(घ) कर्मधारयः।

10) (ख) शुकनासः 1

अथवा

(क) अभिनवयौवनत्वम्

11) (ख) परिचयम् 1

12) (ग) सरस्वतीपरिगृहीतम् 1

13) (घ) न अल्पम् अपि उपदेष्टव्यम्। 1

14) (क) अनञ्जनवर्तिसाध्यः 1

15) (घ) यौवराज्याभिषेकाय। 1

16) (क) विषयात्यासङ्गः 1

17) (ग) राजलक्ष्म्याः 1

18) (घ) रागम्। 1

19) (क) कौस्तुभमणेः 1

20) (घ) प्रावृडा। 1

**[B] पञ्चदशप्रश्नानां (21-35) यथानिर्देशम् उत्तराणि लिखत। यत्र प्रश्ने विकल्पः दत्तः अस्ति तत्र अन्यतरः समाधेयः 2x15=30**

21) युक्तियुक्तं मेलनं कुरुत 2

III. शास्त्रजलप्रक्षालननिर्मला ख तत्पुरुषः

IV. समुपचितमूलदण्डकोशमण्डलम् ग बहुव्रीहिः

22) युक्तियुक्तं मेलनं कुरुत 2

IX. तरुणं सर्षपशाकं नवोदनं पिच्छिलानि च दधीनि ख आर्याच्छन्दसः

X. न खलु न खलु बाणः सन्निपात्योऽयमस्मिन् ग मालिनीछन्दसः

23) युक्तियुक्तं मेलनं कुरुत 2

I. गोष्ठे गिरिं सव्यकरेण धृत्वा ग इन्द्रवज्राछन्दसः

II. अंहो हन्ति ज्ञानवृद्धिं विधत्ते क शालिनीछन्दसः

अथवा

24) युक्तियुक्तं मेलनं कुरुत 2

I. कालिदसः ग अभिज्ञानशाकुन्तलम्

II. अश्वघोषः क बुद्धचरितम्

अथवा

रिक्तस्थानं योग्यपदेन पूरयत –

V. रम्भापादपाः

VI. रसना

25) युक्तियुक्तं मेलनं कुरुत 2

I. नैषधीयचरितम् ख श्रीहर्षः

II. राजतरङ्गिणी क कल्हणः

26) निम्नलिखिविधानेषु सत्यम् वा इति निर्धारणं कुरुत 2

III. असत्यम्

IV. सत्यम्

27) निम्नलिखिविधानेषु सत्यम् असत्यम् वा इति निर्धारणं कुरुत 2

III. सत्यम्

IV. सत्यम्

अथवा

निम्नलिखिविधानेषु सत्यम् असत्यम् वा इति निर्धारणं कुरुत

III. सत्यम्

IV. सत्यम्

28) निम्नलिखिविधानेषु सत्यम् असत्यम् वा इति निर्धारणं कुरुत 2

III. असत्यम्

IV. सत्यम्

29) निम्नलिखिविधानेषु सत्यम् असत्यम् वा इति निर्धारणं कुरुत 2

V. असत्यम्

VI. सत्यम्

30) निम्नलिखिविधानेषु सत्यम् असत्यम् वा इति निर्धारणं कुरुत 2

I. सत्यम्

II. सत्यम्

31) रिक्तस्थानं योग्यपदेन पूरयत – 2

VII. अङ्प्रत्ययः

VIII. समवृत्तस्य

32) रिक्तस्थानं योग्यपदेन पूरयत – 2

III. तोटकम्

IV. यमनसभलागः

33) रिक्तस्थानं योग्यपदेन पूरयत –

V. वसन्ततिलका

VI. मालिनी

34) रिक्तस्थानं योग्यपदेन पूरयत – 2

I. कनिष्कस्य

II. अश्वघोषस्य

35) रिक्तस्थानं योग्यपदेन पूरयत – 2

III. रूढितः/रूढितो

IV. लक्षणा

[C] षण्णां प्रश्नानां यथानिर्देशम् उत्तराणि लिखत। 2x6=12

36) माघस्य निवासस्थलं भीनमल्लाख्यं नगरम्। अथवा तेन विरचितस्य शिशुपालवधस्य उपजीव्यं महाभारतम्। 2

37) 'दयितजनवियोगोद्वेगरोगातुराणाम्' इति पद्यं दशावतारचरितकाव्ये विद्यते। तस्य काव्यस्य रचयिता क्षेमेन्द्रः। 2

38) 'केशः काशस्तवकविकासः' इति श्लोके अन्त्यानुप्रासः। तस्य लक्षणं तावद् - 'व्यञ्जनं चेद्यथावस्थं सहाद्येन स्वरेण तु। आवर्त्यतेऽन्त्ययोज्यत्वादन्त्यानुप्रास एव तत्।।' इति। 2

39) मुखचन्द्रः प्रकाशते इत्यत्र रूपकालङ्कारः। तस्य लक्षणम् - 'रूपकं रूपितारोपे विषये निरपह्नवे' इति। 2

40) अपह्नुत्यलङ्कारस्य लक्षणं तावत् 'प्रकृतं प्रतिषिध्यान्यस्थापनं स्यादपह्नुतिः।' इति। अत्र उदाहरणं तावत्

- नेदं नभोमण्डलमम्बुराशि नैताश्च तारा नवफेनभङ्गाः।

नायं शशी कुण्डलितः फणीन्द्रो नासौ कलङ्कः शयितो मुरारिः।। इति। 2

41) रतिहासादीनाम् अभावे रसाः शान्ते लयं प्राप्नुवन्ति। अथवा रसः अभिव्यज्यते इति कस्य अभिनवगुप्ताचार्यस्य मतम्। 2

[D] षट् अनतिदीर्घोत्तरैः समाधत्त। 3x6=18

42) योगिराजस्य समाध्याचरणम् - योगिराजः उज्जयिन्यां विक्रमादित्यकाले समाधिमग्नः इत्यादिक्रमेण षट् वाक्यानि

43) यवनशासनकाले मन्दिरादीनां दशा -मन्दिरे मन्दिरे जयध्वन्यभावः, तीर्थे घण्टानादाभावः, मठेषु वेदघोषाभावः इत्यादिक्रमेण षट् वाक्यानि।

44) यवनशासनकाले दक्षिणदेशे महाराष्ट्रे शिवराजवर्णनक्रमेण षट् वाक्यानि।

45) राजसभास्थिताः स्वार्थनिष्पादनपरा धूर्ताः -

| | |
|---|---|
| i | धनपिशितग्रासगृध्राः |
| ii | आस्थाननलिनीबकाः |
| iii | दोषेषु गुणपक्षपातिनः |
| iv | स्वयमपि विहसन्तः |
| i | इत्यादिविशेषणपुरःसर षट् वाक्यानि। |

46) राजानः हास्यास्पदानि - धूर्तैः प्रतार्यमाणाः, वित्तमदमत्तचित्ताः, आत्मनि आरोपिता-लीकाभिमानाः, मर्त्यधर्माणः, प्रारब्ध-दिव्योचितचेष्टानुभावाः सर्वजनस्य उपहास्य-ताम् उपयान्ति इत्येवंक्रमेण षट् वाक्यानि।

47) शुकनासस्य मते चन्द्रापीडस्य कर्तव्यम् -

क) नवयौवराज्याभिषेकमङ्गलानुभवः।

ख) कुलक्रमागतस्य पूर्वपु◌ुरुषधृतस्य राज्यभारधारणम्।

ग) शत्रुमस्तकावनमनम्।

घ) स्वज्ञातिसमुदायोन्नतिः इत्यादिक्रमेण षट् वाक्यानि।

[E] चत्वारः दीर्घोत्तरैः समाधेयाः। 5x4=20

48) ब्रह्मचारिगुरुमुखेन बालिकाप्राप्तिवृत्तान्तः -

क) सायन्तनकृत्यं सम्पाद्य ब्रह्मचारिगुरुः यदा कुशासीनस्तदा अस्फुटवर्णं वेपमाननिःश्वसनं चित्कारमात्रमेकं क्रन्दनं दूरात् श्रुतवान्। ततः छात्रेषु एकेन यवनभयव्याकुला कन्यका क्रोडे समानीता।

ख) तस्याः कन्यकायाः स्थितिवर्णनम्।

ग) ततः तस्याः सकाशात् अपहरण-वृत्तान्तज्ञानम् इत्येवंक्रमेण दश वाक्यानि। अथवा

सोमनाथमन्दिरलुण्ठनवृत्तान्तः-

क) यवनैः भारतवर्षे आक्रमणम्।

ख) सोमनाथतीर्थस्य वैशिष्ट्यानि।

ग) पुरोहितानाम् आर्तिनादः

49) दुराचारिण्या लक्ष्म्या वशीभूतानां राज्ञां दशाम् आश्रित्य दश वाक्यानि। अथवा

विवेकहीना राजानः किं किं कुर्वन्तीति तदाश्रित्य दश वाक्यानि।

50) क) पुनरुक्तवदाभासालङ्कारलक्षणम्।

ख) लक्षणार्थः।

ग) उदाहरणे समन्वयः। अथवा

क) उपमालक्षणम्।

ख) लक्षणार्थः।

ग) उदाहरणे लक्षणसमन्वयः।

51) रससूत्रविषये मतभेदाः

- क) रससूत्रविवरणम्।
- ख) उत्पत्तिवादः।
- ग) अनुमितिवादः।
- घ) भुक्तिवादः।
- ङ) अभिव्यक्तिवादः।

--)(O)(--